# Avadhuta Upanishad

# અવધૂતોપનિષત્

## Document Information

Text title : Avadhuta Upanishad

File name : avadhuta.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 79 / 108; Krishna Yajurveda - Sanyasa upanishad

Latest update : Mar. 27, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# અવધૂતોપનિષત્

ગૌણમુખ્યાવધૂતાલિહૃદયામ્બુજવર્તિ યત્ ।
તત્ત્રૈપદં બ્રહ્મતત્ત્વં સ્વમાત્રમવશિષ્યતે ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ અથ હ સાંકૃતિર્ભગવન્તમવધૂતં દત્તાત્રેયં
પરિસમેત્ય પપ્રચ્છ ભગવન્કોઽવધૂતસ્ય કા સ્થિતિઃ કિં
લક્ષ્મ કિં સંસરણમિતિ । તં હોવાચ ભગવો દત્તાત્રેયઃ
પરમકારુણિકઃ ॥

અક્ષરત્વાદ્વરેણ્યત્વાદ્ધૂતસંસારબન્ધનાત્ ।
તત્ત્વમસ્યાદિલક્ષ્યત્વાદવધૂત ઇતીર્યતે ॥ ૧॥

યો વિલઙ્ઘ્યાશ્રમાન્વર્ણાનાત્મન્યેવ સ્થિતઃ સદા ।
અતિવર્ણાશ્રમી યોગી અવધૂતઃ સ કથ્યતે ॥ ૨॥

તસ્ય પ્રિયં શિરઃ કૃત્વા મોદો દક્ષિણપક્ષકઃ ।
પ્રમોદ ઉત્તરઃ પક્ષ આનન્દો ગોષ્પદાયતે ॥ ૩॥

ગોપાલસદૃશાં શીર્ષે નાપિ મધ્યે ન ચાપ્યધઃ ।
બ્રહ્મપુચ્છં પ્રતિષ્ઠેતિ પુચ્છાકારેણ કારયેત્ ॥ ૪॥

એવં ચતુષ્પથં કૃત્વા તે યાન્તિ પરમાં ગતિમ્ ।
ન કર્મણા ન પ્રજયા ધનેન ત્યાગેનૈકે અમૃતત્વમાનશુઃ ॥ ૫॥

સ્વૈરં સ્વૈરવિહરણં તત્સંસરણમ્ । સાંબરા વા દિગંબરા વા ।
ન તેષાં ધર્માધર્મૌ ન મેધ્યામેધ્યૌ । સદા
સાંગ્રહણ્યેષ્ટ્યાશ્વમેધમન્તર્યાગં યજતે ।

સ મહામખો મહાયોગઃ । કૃત્સ્નમેતચ્ચિત્રં કર્મ।
સ્વૈરં ન વિગાયેત્તન્મહાવ્રતમ્ । ન સ મૂઢવલ્લિપ્યતે ।
યથા રવિઃ સર્વરસાન્પ્રભુઙ્ક્તે
   હુતાશનશ્ચાપિ હિ સર્વભક્ષઃ ।
તથૈવ યોગી વિષયાન્પ્રભુઙ્ક્તે
   ન લિપ્યતે પુણ્યપાપૈશ્ચ શુદ્ધઃ ॥ ૬॥

આપૂર્યમાણમચલપ્રતિષ્ઠં
   સમુદ્રમાપઃ પ્રવિશન્તિ યદ્વત્ ।
તદ્વત્કામા યં પ્રવિશન્તિ સર્વે
   સ શાન્તિમાપ્નોતિ ન કામકામી ॥ ૭॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૮॥

ઐહિકામુષ્મિકવ્રાતસિદ્ધ્યૈ મુક્તેશ્ચ સિદ્ધયે ।
બહુકૃત્યં પુરા સ્યાન્મે તત્સર્વમધુના કૃતમ્ ॥ ૯॥

તદેવ કૃતકૃત્યત્વં પ્રતિયોગિપુરઃસરમ્ ।
અનુસન્દધદેવાયમેવં તૃપ્યતિ નિત્યશઃ ॥ ૧૦॥

દુઃખિનોઽજ્ઞાઃ સંસરન્તુ કામં પુત્રાદ્યપેક્ષયા ।
પરમાનન્દપૂર્ણોઽહં સંસરામિ કિમિચ્છયા ॥ ૧૧॥

અનુતિષ્ઠન્તુ કર્માણિ પરલોકયિયાસવઃ ।
સર્વલોકાત્મકઃ કસ્માદનુતિષ્ઠામિ કિં કથમ્ ॥ ૧૨॥

વ્યાચક્ષતાં તે શાસ્ત્રાણિ વેદાનધ્યાપયન્તુ વા ।
યેઽત્રાધિકારિણો મે તુ નાધિકારોઽક્રિયત્વતઃ ॥ ૧૩॥

નિદ્રાભિક્ષે સ્નાનશૌચે નેચ્છામિ ન કરોમિ ચ ।
દ્રષ્ટારશ્ચેત્કલ્પયન્તુ કિં મે સ્યાદન્યકલ્પનાત્ ॥ ૧૪॥

ગુઞ્જાપુઞ્જાદિ દહ્યેત નાન્યારોપિતવહ્નિના ।
નાન્યારોપિતસંસારધર્મા નૈવમહં ભજે ॥ ૧૫॥

શ‍ૃણ્વન્ત્વજ્ઞાતતત્ત્વાસ્તે જાનન્કસ્માચ્છૃણોમ્યહમ્ ।
મન્યન્તાં સંશયાપન્ના ન મન્યેઽહમસંશયઃ ॥ ૧૬॥

વિપર્યસ્તો નિદિધ્યાસે કિં ધ્યાનમવિપર્યયે ।
દેહાત્મત્વવિપર્યાસં ન કદાચિદ્ભજામ્યહમ્ ॥ ૧૭॥

અહં મનુષ્ય ઇત્યાદિવ્યવહારો વિનાપ્યમુમ્ ।
વિપર્યાસં ચિરાભ્યસ્તવાસનાતોઽવકલ્પતે ॥ ૧૮॥

આરબ્ધકર્મણિ ક્ષીણે વ્યવહારો નિવર્તતે ।
કર્મક્ષયે ત્વસૌ નૈવ શામેદ્ધ્યાનસહસ્રતઃ ॥ ૧૯॥

વિરલત્વં વ્યવહૃતેરિષ્ટં ચેદ્ધ્યાનમસ્તુ તે ।
બાધિકર્મવ્યવહૃતિં પશ્યન્ધ્યાયામ્યહં કુતઃ ॥ ૨૦॥

વિક્ષેપો નાસ્તિ યસ્માન્મે ન સમાધિસ્તતો મમ ।
વિક્ષેપો વા સમાધિર્વા મનસઃ સ્યાદ્વિકારિણઃ ।
નિત્યાનુભવરૂપસ્ય કો મેઽત્રાનુભવઃ પૃથક્ ॥ ૨૧॥

કૃતં કૃત્યં પ્રાપણીયં પ્રાપ્તમિત્યેવ નિત્યશઃ ।
વ્યવહારો લૌકિકો વા શાસ્ત્રીયો વાન્યથાપિ વા ।
મમાકર્તુરલેપસ્ય યથારબ્ધં પ્રવર્તતામ્ ॥ ૨૨॥

અથવા કૃતકૃત્યેઽપિ લોકાનુગ્રહકામ્યયા ।
શાસ્ત્રીયેણૈવ માર્ગેન વર્તેઽહં મમ કા ક્ષતિઃ ॥ ૨૩॥

દેવાર્ચનસ્નાનશૌચભિક્ષાદૌ વર્તતાં વપુઃ ।
તારં જપતુ વાક્તદ્વત્પઠત્વામ્નાયમસ્તકમ્ ॥ ૨૪॥

વિષ્ણું ધ્યાયતુ ધીર્યદ્વા બ્રહ્માનન્દે વિલીયતામ્ ।
સાક્ષ્યહં કિંચિદપ્યત્ર ન કુર્વે નાપિ કારયે ॥ ૨૫॥

કૃતકૃત્યતયા તૃપ્તઃ પ્રાપ્તપ્રાપ્યતયા પુનઃ ।
તૃપ્યન્નેવં સ્વમનસા મન્યતેસૌ નિરન્તરમ્ ॥ ૨૬॥

ધન્યોઽહં ધન્યોઽહં નિત્યં સ્વાત્માનમઞ્જસા વેદ્મિ ।
ધન્યોઽહં ધન્યોઽહં બ્રહ્માનન્દો વિભાતિ મે સ્પષ્ટમ્ ॥ ૨૭॥

ધન્યોઽહં ધન્યોઽહં દુઃખં સાંસારિકં ન વીક્ષેઽદ્ય ।
ધન્યોઽહં ધન્યોઽહં સ્વસ્યાજ્ઞાનં પલાયિતં ક્વાપિ ॥ ૨૮॥

ધન્યોઽહં ધન્યોઽહં કર્તવ્યં મે ન વિદ્યતે કિંચિત્ ।
ધન્યોઽહં ધન્યોઽહં પ્રાપ્તવ્યં સર્વમત્ર સમ્પન્નમ્ ॥ ૨૯॥

ધન્યોઽહં ધન્યોઽહં તૃપ્તેર્મે કોપમા ભવેલ્લોકે ।
ધન્યોઽહં ધન્યોઽહં ધન્યો ધન્યઃ પુનઃ પુનર્ધન્યઃ ॥ ૩૦॥

અહો પુણ્યમહો પુણ્યં ફલિતં ફલિતં દૃઢમ્ ।
અસ્ય પુણ્યસ્ય સમ્પત્તેરહો વયમહો વયમ્ ॥ ૩૧॥

અહો જ્ઞાનમહો જ્ઞાનમહો સુખમહો સુખમ્ ।
અહો શાસ્ત્રમહો શાસ્ત્રમહો ગુરુરહો ગુરુઃ ॥ ૩૨॥

ઇતિ ય ઇદમધીતે સોઽપિ કૃતકૃત્યો ભવતિ । સુરાપાનાત્પૂતો ભવતિ ।
સ્વર્ણસ્તેયાત્પૂતો ભવતિ । બ્રહ્મહત્યાત્પૂતો ભવતિ ।
કૃત્યાકૃત્યાત્પૂતો ભવતિ । એવં વિદિત્વા સ્વેચ્છાચારપરો
ભૂયાદોંસત્યમિત્યુપનિષત્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યવધૂતોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Avadhuta Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*